M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Ser. 271

Title: Chalacha Vidhi
(Samkshipa)

Pate

271

संक्षिप्त चलार्चा विधिः

271

| | |
|---|---|
| Samkshiptā Chalārchā Vidhi | Title |
| Ananta Deva | Author |
| | Editor |
| | Year, Vols. |
| | Publisher |
| 271 | Remarks |

मध्यवेद्यां

मंडपांतः उदीच्यां प्राच्यां वा स्थंडिलं तत्पूर्वतो हस्तमात्रा वेदिः तदुत्तरे स्नानोपकरणानि मध्यवेद्यां नैर्ऋत्ये वास्तुमंडलं मध्ये वेद्यां सर्व तोभद्रं तदुत्तरे स्वस्तिकोपरि शय्यास्थापनं ·

चलाचा · श्रीगणेशायनमः अथ नृसिंहपरिचर्योद्युक्तं चलाचलस्थापनविधिरुच्यते कुंडमंडपा

दिनात्रावश्यकं यजमानः सुस्नातः कृतनित्यक्रियः देशकालोचितं तत्प्रतिष्ठाचितसं

कीर्त्तनपूर्वकं तत्तद्देवताप्रसादेच्छुकस्य चलार्चाप्रतिष्ठासंकल्प्य तदंगत्वेन स्वशाखोक्तरी

१ त्या गणपतिपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानि तत्कृत्वा आचार्यं वृणुयात् ·

तत्राप्यशक्तः स्वयमेव वा कुर्यात् तत्रसंकल्पः अस्यां प्रतिमायां देवतासान्निध्या

र्थं दीर्घायुर्विपुलश्रीलक्ष्मीसमृद्धिअक्षय्यसुखकामोहं अमुकदेवताप्रतिष्ठां करि

ष्ये इति संकल्प्य तत आचार्यः अग्निं सप्तिमिति सूक्तस्य वैश्वानरोग्निस्त्रिष्टु

प् अग्न्युत्तारणे विनियोगः अग्निपदरहितेन सहितेन चाग्निः सप्तिमिति सूक्ते

नाग्न्युत्तारणं कृत्वा यदत्र संस्थितं० श्वेतसर्षपान् विकीर्य शुचीव इति तृचेन पं अप्सु सेभूं०

चगव्येन कुशोदकेन च स्नापयेदेव यजनं प्रोक्ष्य स्व० स्वस्त्ययनं तार्क्ष्यमिति मंत्रमंत्र

४ आचार्यं ब्रह्मसाहस्त्य ऋत्विग्वरणं यथाशक्त्या० आचार्यः पवनपावनादिभिस्तच्छुध्यंतं कुर्यात् ततः मंगलद्रव्योपेतं कलशं सुवा

सिनी शिरसि धृत्वा ब्रह्मघोषेण देवतायतनं गच्छेत् ततः विधिवत् पंचगव्यं कृत्वा · ४

देवा आयांतु यातुधाना अपयांतु विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कुर्यात् · मंडपपूजा · ततः नैर्ऋत्यां वास्तुमंडलं · विशंतु भू० इत्यादि लोकपालां

तां स्थाप्य पूज्य स्वागतं० ईशान्यां स्नानमंडपिकायां वेद्यां वस्त्रप्रावृते पीठे अर्चां स्थाप्य द्वादशधा मृत्स्नानादि विधाय वस्त्रयज्ञोपवीतादि धूपांतं

पूज्य सौ मध्यवेद्यां सर्वतोभद्रे ब्रह्मादिदेवताः पंचधान्यं तन्नाम्ना [illegible] गंधादिभिः संपूज्य [illegible] पूर्वोक्त सौ प नवग्रहस्थापनं ततो [illegible]

इत्येन संप्रार्थ्य स्थंडिलेग्निं प्रतिष्ठाप्य आश्वलायनयजमानेन्वादध्यात् चक्षुषी आज्ये

नेत्यंते नवग्रहान् लोकपालान् वास्तुदेवताः सर्वतोभद्रदेवताः कर्मांगप्रधानदेवताः क्रतुसं

रक्षदेवताः समिदाज्यचरून् अमुकसंख्यया यक्ष्ये स्थाप्यदेवं समिदाज्यचरु

तिलाहुतिभिः प्रत्येकमष्टोत्तरशतसंख्यया यक्ष्ये शेषेण स्विष्टकृदित्यादिचरुश्रपणांतं कृत्वाज्य

भागांते लिंगमर्चां वैशान्दिशि वेदिकायां वस्त्राद्यास्तृते पीठे वा स्थापितां मष्टकृत्वा मृदा

संस्नाप्य तत्सवितुरिति गायत्र्या गोमूत्रं · गंधद्वारामिति गोमयं · आप्यायस्वेति

क्षीरं · दधिक्राव्ण इति दधि · तेजोसीति घृतेन · मधुवाता इति मधु · आयं गौरिति

शर्करया पंचामृतेनाभिषिच्य अर्चादेः प्रागाद्यष्टदिक्षु महीद्यौरित्यादि विधिना

८ अष्टौ कलशान् वारिपूर्णान् दूर्वासिद्धार्थपंचत्वक् पंचपल्लवोपेतान् प्रतिष्ठाप्य तेरापो

हिष्ठामयोभुव इत्याद्यैर्मंत्रैः प्रत्येकमाद्यन्तैरभिषिच्य तत्र मंत्राः आपो हिष्ठा० १

यदंतियच्च ५ तत्त्वसंदी ४ समुद्रज्येष्ठाः ४ ततमंहोत्र ७ शुचीवोहव्या ० गायत्र्यामूलमंत्रेणत्वा
च॰ पी॰ भिषिच्य वस्त्रगंधाद्युपचारैर्नाममंत्रेणाभ्यर्च्य सर्वतोभद्रेष्टदलेवामध्यभागास्थितभद्रपीठे
८ परिस्थापितार्चादेः प्राच्यादिदिक्षु शुद्धोदकपूर्णान्कलशान्गंधाक्षतचूतपल्लवापशोभि
२ तान्संस्थाप्यतत्रैवाष्टौघृतदीपान्प्रज्वाल्य उत्तरतएककलशंस्थाप्य देवंदक्षिणपा
र्श्वेउदङ्मुखंस्तिष्ठन् चित्रंदेवानामित्यृचैव सुवर्णशलाकयागंधेन नेत्रोन्मीलन्य
देवस्यस्वेतिमधुनाचनेत्रोन्मीलनंविधाय मुकुरादिदर्शयित्वापंचगव्याद्यादिसमर्प्य
चित्रान्नबलिंदत्वा पुरुषसूक्तंश्रावयित्वा तेनैवस्तुत्वाषडंगदेवताः संपूज्यस्थंडि
लेसमेत्यसमिदाज्यतिलद्रव्यैः प्रत्येकमष्टोत्तरशतसंख्यया प्रतिष्ठाप्यदेवता
मंत्रेणजुहुयात् एकैकद्रव्यहोमांतेदेवंस्पृशेत् आज्यहोमप्रोत्तरतः स्थापि
तकलशेसंपातान्क्षिपेत् स्विष्टकृतादिपूर्णाहुत्यंतं कृत्वा होमशेषंसमाप्याचो २
समीपमागत्यप्रतिष्ठाप्यदेवान्हृदिध्यात्वा सुरभिपुष्पपूर्णमंजलिं कृत्वानि
पादनाभिशिरःसु

जहृत्कमलेसर्वसाक्षिणमणीयांसंतेजोमयंध्यात्वा तत्तेजोहृदयकमलात्नासा
मार्गेणकरस्थितपुष्पेषु निःसृतं विचिंत्यतत्पूर्णांजलिंस्वमस्तकोर्ध्वंनीत्वासुमुहूर्तेन
तेन्मूलमंत्रोच्चारणपूर्वकं प्रतितिष्ठ परमेश्वरेतिदेवमूर्ध्नि पुष्पांजलिंक्षिपन् तत्ते
जोदेवशरीरंब्रह्मरंध्रद्वाराप्रविशत्ध्यायेत् ततः आत्वाहार्षमितिसूक्तेन गृहावेप्रतिष्ठासूक्त
मितिस्वशाखीयविधिना प्रतिष्ठितोभवेतिचप्रतिष्ठाप्यप्रणवेननिरुध्यप्राणप्रतिष्ठांकुर्यात् ·
अस्यश्रीप्राणप्रतिष्ठामंत्रस्य · ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुःसामाथर्वाणिछंदांसि ·
पराप्राणशक्तिर्देवता · आंबीजं · ह्रींशक्तिः · क्रोंकीलकं · अमुकार्चायाः प्राणप्रतिष्ठा
पनेविनियोगः प्राणान्प्रतिष्ठाप्यगर्भाधानादिसंस्कारसिध्यर्थंप्रणवजपंयथाशक्तिकृ
त्वासुप्रसन्नोवरदोभवेतिपुरुषसूक्तेनस्तोत्रेणचस्तुवीत अथवैदिकतांत्रिकपौरा
णिकान्यतमेनसमुच्चितेनवाविधिनादेवंपूजयेत् तत्रस्नानोत्तरपंचामृतैरभिषिंच्य
संपातकलशोदकेनइमाआपःशिवतमाइत्यादिमंत्रैः शुद्धोदकेनचसंस्नाप्यवस्त्रा

च.चौ. दिदीपांतानुपचारान्समर्प्यपुरुषाहारपर्याप्तंनानाविधंनैवेद्यंसमर्प्यकेशरपाप्यसंवानिवेद्यमहा
नीराजनंकृत्वादेवस्यपादयोःपुष्पांजलिंप्रक्षिप्यसयजमानआचार्योशक्त्यादंडवन्न
२ मस्कुर्यात् ततःपुष्पांजलिंदत्वाष्टेवैपंचागंन्यासंकुर्यात् देवमनेकधासंप्रार्थ्यशरणा
गतेयमस्ययजमानस्यकुलेसानुग्रहदृष्टिर्भवात्विति पुनःपुष्पांजलिंदत्वादेवपार्श्वे
कलशेब्राह्मणसहितोयजमानस्यसकुटुंबस्यसमुद्रज्येष्ठाद्यास्त्यादिभिःसुरास्त्वा
मित्यादिभिश्चाभिषेकंकुर्यात् ततोयजमानः गामाचार्यायपूजापूर्वकंदक्षिणादि
दत्वाप्येयिश्चभूयसींदक्षिणांदत्वायथाशक्तिब्राह्मणान्भोजयित्वाकर्मेश्वरार्पणं
कृत्वायस्यस्मृत्या॰ मंत्रहीनं॰ यत्करोषियद॰ यांतुदेव॰ गछगछसुरुधुन्कोपुं
डीतेति इत्यनंतदेवकृतसंक्षिप्तचलार्चाविधिः समाप्तः॥ उमयशानेमसिगिपनिबंध

२